# 97 - सप्तनवतितम दशकम्
# उत्तम भक्ति प्रार्थना

त्रैगुण्यात् भिन्न रूपं भवति हि भुवने हीन मध्योत्तमं यत्
ज्ञानं श्रद्धा च कर्ता वसति रपि सुखं कर्म चाहार भेदा: ।
त्वत् क्षेत्र त्वन् निषेवादि तु यदिह पुन: त्वत् परं तत्तु सर्वं
प्राहुर् नैगुण्य निष्ठं तदनु भजनतो मङ्क्षु सिद्धो भवेयम् ॥ ॥97-1॥

त्वय्येव न्यस्त चित्त: सुखमयि विचरन् सर्व चेष्टास् त्व दर्थं
त्वद्भक्तैस् सेव्यमानान् अपि चरित चरान् आश्रयन् पुण्य देशान् ।
दस्यौ विप्रे मृगादिष्वपि च सममति: मुच्यमा नावमान
स्पर्धा सूयादि दोष: सतत मखिल भूतेषु संपूजये त्वाम् ॥ ॥97-2॥

त्वत् भावो यावदेषु स्फुरति न विशदं ताव देवं ह्युपास्तिं
कुर्वन् नैकात्म्य बोधे झटिति विकसति त्वन्मयोऽहं चरेयम् ।
त्वत् धर्मस्यास्य तावत् किमपि न भगवन् प्रस्तुतस्य प्रणाश:
तस्मात् सर्वात्म नैव प्रदिश मम विभो भक्तिमार्गं मनोज्ञम् ॥ ॥97-3॥

तं चैनं भक्ति योगं द्रढयितु मयि मे साध्य मारोग्य मायु:
दिष्ट्या तत्रापि सेव्यं तव चरण महो भेषजा येव दुग्धम् ।
मार्कण्डेयो हि पूर्वं गणक निगदित द्वादशाब्दायु रुच्चै:
सेवित्वा वत्सरं त्वां तव भट निवहै: द्रावयामास मृत्युम् ॥ ॥97-4॥

मार्कण्डेयश् चिरायु: स खलु पुनरपि त्वत्पर: पुष्प भद्रा
तीरे निन्ये तपस्यन् अतुल सुख रति: षट् तु मन्वन्तराणि ।
देवेन्द्रस् सप्तमस् तं सुर युवति मरुन् मन्मथैर् मोहयिष्यन्
योगोष्म प्लुष्यमाणै: न तु पुन रशकत् त्वज्जनं निर्जयेत् क: ॥ ॥97-5॥

प्रीत्या नारायणाख्यस् त्वम् अथ नर सखः प्राप्तवानस्य पार्श्वं
तुष्ट्या तोष्टूयमानः स तु विविध वरैर् लोभितो नानुमेने ।
द्रष्टुं माय़ां त्वदीयां किल पुन रवृणोत् भक्ति तृप्तान्तरात्मा
माया दुःखा नभिज्ञः तदपि मृगयते नून माश्चर्य हेतोः ॥ ॥97-6॥

याते त्वय्याशु वाताकुल जलद गलत् तोय पूर्णाति घूर्णत्
सप्तार्णो राशि मग्ने जगति स तु जले सम्भ्रमन् वर्ष कोटीः ।
दीनः प्रैक्षिष्ट दूरे वट दल शयनं कञ्चि दाश्चर्य बालं
त्वामेव श्यामलाङ्गं वदन सरसिज न्यस्त पादाङ्गुलीकम् ॥ ॥97-7॥

दृष्ट्वा त्वां हृष्ट रोमा त्वरित मुपगतः स्प्रष्टु कामो मुनीन्द्रः
श्वासेनान्तर् निविष्टः पुनरिह सकलं दृष्टवान् विष्ट पौघम् ।
भूयोऽपि श्वास वातैः बहि रनुपतितो वीक्षितस् त्वत् कटाक्षैः
मोदा दाश्लेष्टु कामः त्वयि पिहित तनौ स्वाश्रमे प्राग् वदासीत् ॥97-8॥

गौर्या सार्धं तदग्रे पुरभि दथ गतः त्वत् प्रिय प्रेक्षणार्थी
सिद्धा नेवास्य दत्वा स्वय मय मजरा मृत्यु तादीन् गतोऽभूत् ।
एवं त्वत् सेवयैव स्मर-रिपु रपि स प्रीयते येन तस्मात्
मूर्ति त्रय्यात्मकस् त्वं ननु सकल नियन्तेति सुव्यक्त मासीत् ॥97-9॥

त्र्यंशेस्मिन् सत्यलोके विधि हरि पुरभिन् मन्दिराण्यूर्ध्व मूर्ध्वं
तेभोऽप्यूर्ध्वं तु माया विकृति विरहितो यू भाति वैकुण्ठ लोकः ।
तत्र त्वं कार णाम्भसि अपि पशुप कुले शुद्ध सत्त्वैक रूपी
सच्चित् ब्रह्माद्वयात्मा पवन पुरपते पाहि मां सर्व रोगात् ॥॥97-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥

STOTRADHWANI